## विभाषा भाषायाम् । (१८१/३६८४)

षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिस्तदन्ते पदे उपोत्तममुदात्तं भवति विभाषा भाषायां विषये । पञ्चभिः, पञ्चभिः । सप्तभिः, सप्तभिः । तिसृभिः, तिसृभिः । चतुर्भिः, चतुर्भिः ॥

## न गोश्वन्त्साववर्णराडङ्क्रुङ्कृद्भ्यः । (१८२/३७२६)

गो श्वन्, साववर्णः सौ प्रथमैकवचने यदवर्णान्तम्, राड् अङ क्रुङ कृद् इत्येतेभ्यो यदुक्तं तन् न भवति । गवा, गवे, गोभ्याम् इति । 'सावेकाचस्तृतीयादिर्विभक्तिः' (६.१.१६८/३७१४) इति [1]प्राप्तिः प्रतिषिध्यते । सुगुना, सुगवे, सुगुभ्याम् । 'अन्तोदात्तादुत्तरपदात्' (६.१.१६९/३७१५) इति प्राप्तिः[2] । श्वन् – शुना, शुने, श्वभ्याम् । परमशुना, परमशुने, परमश्वभ्याम् । पूर्ववत् प्राप्तिः । साववर्णः – सौ प्रथमैकवचने यदवर्णान्तं तस्य ग्रहणम् । येभ्यः । तेभ्यः । केभ्यः । राट् – राजतिः क्विबन्तः । राजा । परमराजः[3] । अङ – अञ्चतिः क्विबन्तः, तस्य सनकारस्य ग्रहणं विषयावधारणार्थम्, यत्रास्य नलोपो नास्ति तत्र प्रतिषेधो यथा स्यात् । 'नाञ्चेः पूजायाम्' (६.४.६०/४२४) इति प्रतिषिध्यते नलोपः । प्राञ्चा । प्राङ्भ्याम् । नलोपविषये तु भवत्येव विभक्तेरुदात्तत्वम् । प्राचा । प्राचे । प्राग्भ्याम् । क्रुङ क्विन्नन्त एव – क्रुञ्चा । परमक्रुञ्चा । कृत् – करोति कृतिर्वा क्विबन्तः । कृता । परमकृता ॥

## दिवो झल् । (१८३/३७२७)

दिवः परा झलादिर्विभक्तिः नोदात्ता भवति । द्युभ्याम् । द्युभिः । 'सावेकाचः' (६.१.१६८/३७१४) इति 'ऊडिदंपदाद्यप्पुम्रैद्युभ्यः' (६.१.१७१/३७१७) इति वा प्राप्तिः प्रतिषिध्यते । झलि इति किम् ? दिवा[4] ॥

## नृ चान्यतरस्याम् । (१८४/३७२८)

नृ इत्येतस्मात् परा झलादिर्विभक्तिः अन्यतरस्यां [5]नोदात्ता भवति । नृभ्याम् । 'नृभिः' (ऋ. १०.१४७.४) । 'नृभ्यः' (ऋ. १.४३.२) । 'नृषु' (ऋ. १.१८०.८) झल् इत्येव – न्रा । न्रे ॥

## तित् स्वरितम् । (१८५/३७९९)

तित् स्वरितं भवति । सन्नन्ताद् यत् – चिकीर्ष्यम् । जिहीर्ष्यम् । 'ऋहलोर्ण्यत्' (३.१.१२४/२८७२)–कार्यम् । हार्यम् । प्रत्ययाद्युदात्तस्यापवादः ॥

---

1. स्वरः ह. 2. प्रतिषिध्यते इत्यधिकम् फ. 3. परमराजे इत्यधिकम् ड. 4. दिवे इत्यधिकम् क. ह. 5. अन्तोदात्ता क. ह.